**असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्।**
**अपरस्परसम्भूतं किमन्यत्कामहैतुकम्॥ ८॥**

'सत्यं ज्ञानमनन्तं ब्रह्म'[1] इत्यादिश्रुतिप्रतिपादितं विष्णुः स न विद्यते कर्तृत्वादिना यस्य तत् **असत्यं** जगत्। प्रतितिष्ठत्यस्मिन्निति **प्रतिष्ठा** विष्णुः। स न विद्यते यस्य तत् **अप्रतिष्ठम्।** नास्तीश्वरो नियामको यस्य तत् **अनीश्वरम्** जगत् **आहुः।** सत्त्वेनासत्त्वेन सदसत्त्वेन सदसद्भिन्नत्वेन च विचारासहत्वात् जगदसत्यं शुक्ते रूप्यमिव। अत एव **अप्रतिष्ठम्** आश्रयशून्यम्। नहि त्रैकालिकनिषेधप्रतियोगिनः शुक्तिरूप्यादेः खपुष्पादेर्वा कश्चिदाश्रयोऽस्ति। अत एव **अनीश्वरम्।** नहि शुक्तिरूप्यखपुष्पादेरीक्षणपूर्वककर्ता पालयिता संहर्ता चास्ति। विश्वमिथ्यात्वनिरीश्वरत्वादिमतमेव मुख्यमासुरमिति भावः।

ननु यदि विश्वं मिथ्येति तत्कर्ता न कश्चित्, तर्हि कथमुत्पद्यते? 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः आकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी'[2] इति श्रुत्याऽपि विश्वस्य सकारणकत्वमुक्तम्। तथा च यतो जगदुत्पन्नं स एवेश्वरः। तत्राह - **अपरस्परसम्भूतं** न भवत्येकस्मादेकस्योत्पत्तिरिति क्रमेण नोत्पन्नं येन कर्ताऽपेक्षेत। नहि मरुमरीचिकोदकोत्पत्त्यर्थं कर्तादिकारकं क्रम अपेक्षते।

ननु पितुः सकाशात् पुत्रोत्पत्तिदर्शनात् पुत्रे पिता कारणम्। एवं विश्वस्मिन्नीशवरो हेतुः। किञ्च, सत्यं न चेत्, किं तर्हि शशशृङ्गतुल्यम्? परस्परसम्भूतं न चेत्, किं तर्ह्यनादि? तत्राह - **अन्यत्** सदसदादितोऽन्यत्। सत्त्वासत्त्वादिना वक्तुमशक्यम्। शशशृङ्गस्यासत्त्वात् ततो विलक्षणमित्यर्थः। तर्कहतत्वात् परमार्थसच्च न भवति। किन्तु, व्यावहारिकं मृषाभूतं परमार्थतस्तु शून्यमेव।

'द्वे सत्त्वे समुपाश्रित्य बुद्धानां धर्मदेशना।
लोके सांवृतसत्त्वं[3] स्यात् सत्त्वं च परमार्थतः।
सांवृतं[4] व्यावहार्यं स्यान्निवृत्तौ पारमार्थिकम्॥' इति।

[1] **तैत्तिरीयोपनिषत्** २.२.१ [2] **तैत्तिरीयोपनिषत्** २.१.१ [3] संवृतसत्त्वमिति कोशे। [4] संवृतमिति कोशे।

काम इच्छा हेतुर्यस्य तत् कामहैतुकम्। यदिच्छया यत्र पुरुषोऽवलोकते तत्रैव तस्योत्पत्तिः। दृष्टिसमकालीना दृष्टिरेव वा सृष्टिः। विज्ञानासमकालीनाया विज्ञानभिन्नाया सृष्टेरभावात्। पितृपुत्रादिक्रमश्च स्वाप्निकक्रमवदुपपद्यते। स्वाप्निकश्रुतिवदुक्तक्रमबोधकश्रुतिरप्युपपद्यते।

अत्र नव्या दृष्टिभिन्ना दृष्टिसमकालीना सृष्टिरस्तु। अथापि विश्वं मिथ्यैव दृश्यत्वादितः, तर्कहतत्वाच्च। ईश्वरकर्तृत्वादिबोधकश्रुतिस्तु स्वाप्निकश्रुतिवदुपपद्यते। तदधिष्ठानत्वेन स्वप्रकाशं सर्वप्रमाणागम्यं चैतन्यं परमार्थसदित्याहुः। अत्र चैतन्यस्याप्रामाणिकस्य खपुष्पादितुल्यत्वेन प्राचीनापेक्षयोक्तिमात्रस्यैव भेदः। श्रुतिभिन्नमानवेद्यं तेन मृषा स्वीक्रियते। 'यतो वाचो निवर्तन्ते'[1] इत्यादिश्रुतिं विवृण्वता शब्दागम्यत्वं च स्वीकृतम्। नच शब्दलक्ष्यं तत्। शब्दावाच्यस्य लक्ष्यत्वासम्भवात्। स्वप्रकाशत्वहानेः। विश्वमिथ्यात्वमङ्गीकुर्वतो निरीश्वरादित्वं तु स्फुटमेव।

'मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमुच्यते।
मयैव कथितं देवि कलौ ब्राह्मणरूपिणा॥'[2]

इति पाद्मे रुद्रेणैव तन्मतस्य बौद्धान्तर्गतत्वोक्तेः॥ ८॥